संस्कृतवार्ता:

26/09/2025

सायम्  - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी बिहारराज्ये मुख्यमन्त्री-महिला-वृत्ति-योजनायाः शुभारम्भं अकरोत् सहैव प्रोक्तवान् यत् महिला-केन्द्रित-योजनाभ्य: सर्वेऽपि वर्गाः लाभान्विताः सञ्जाताः।

· भारतीय-वायुसेनया षड्-दशकेभ्यः अपि अधिकं कालं यावत् राष्ट्रं सेव्यमानाय प्रख्यात-युद्धविमानाय 'मिग–21' इत्यस्मै अद्य सम्मानपूर्वकं अन्त्यप्रस्थानं आविष्कृतम्।

· राष्ट्रपति-पदासीना द्रौपदी-मुर्मूः अद्य नव-दिल्लीस्थे राष्ट्रपति-भवने प्रतिष्ठित-राष्ट्रीय-भूविज्ञान- पुरस्कारं प्रदत्तवती।

· संयुक्त-राज्य-अमेरिकायाः राष्ट्रपति: डोनाल्ड-ट्रम्पः प्रोक्तवान् यत् सः इज़राइल-देशस्य पश्चिम-तटोऽपरि अधिकारः नैव अङ्गीकरिष्यति।

· पुरुषाणां विंशति-प्रतिविंशतिः एशिया-चषक-प्रतिस्पर्धा दुबई-नगरे भारत-श्रीलंकादेशयोः मध्ये अन्तिमा-'सुपर-फोर' इत्यस्यान्तर्गतं भविष्यति।

<u>प्रधानमन्त्री-बिहारयोजना</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रोक्तवान् यत् प्रशासनेन महिला-केन्द्रिताः बहव्यः योजनाः कार्यक्रमाश्च च प्रचालिताः। एतैः कार्यक्रमैः समाजस्य सर्वेऽपि वर्गाः लाभान्विताः सञ्जाताः। बिहारराज्ये मुख्यमन्त्री–महिला–रोज़गार–योजनायाः शुभारम्भावसरे नवदिल्लीतः दृश्याङ्कन-माध्यमेन भाषमाणः श्रीमोदी अवदत् यत् केन्द्रसर्वकारः तथैव बिहारस्य मुख्यमन्त्रिणः नीतीश–कुमारस्य सर्वकारश्च एकीभूय महिला-कल्याणार्थं कार्यरतौ स्तः।

प्रधानमन्त्रिणा समुद्घोषितं यत् अस्याः योजनायाः अन्तर्गतं पञ्चसप्तति-लक्षाधिकाः महिलाः स्वबैंक–कोषेषु साक्षात् दशसहस्र–रूप्यकाणां लाभं अवाप्नुवन्। तेनोदीरितं यत् अस्याः योजनायाः आधारः एकादश-वर्षेभ्यः पूर्वं प्रधानमन्त्री–जनधन–योजना-माध्यमेन प्रतिष्ठापितः। सः सबलं प्रोक्तवान् यत् भ्रष्टाचारं विना साहाय्यराशिः साक्षात् महिलानां बैंक-कोषेषु प्रेष्यते। मुख्यमन्त्री–

महिला–रोज़गार–योजनां नवरात्रस्य उपहारत्वेन प्रतिपादयता प्रधानमन्त्रिणा विश्वासः प्रकटितः यत् द्विशक्ति-शासनस्य प्रयासेण बिहारे लखपति–स्वसृणां अधिकतमा संख्या भविष्यति।

प्रधानमन्त्रिणा प्रोक्तं यत् केन्द्र-सर्वकारः त्रिकोटि-महिला–उद्यमिनां निर्माणार्थं कृतसंकल्पो वर्तते। अत्रावधेयं यत् एतासु द्विकोट्यधिकाः महिलाः अस्मिन् क्षेत्रे निर्मिताः येन समाजे परिवारे च बृहद्-परिवर्तनं समुत्पन्नम्। श्रीमोदिना विज्ञापितं यत् मुद्रा- ड्रोन दीदी -बीमा सखी- बैंक सखी इत्येताः योजनाः उद्यमावसराणां विस्तारं कुर्वन्ति। जनधन–योजनान्तर्गतं त्रिंशत्- कोट्यधिकानां महिलानां बैंक–कोषाः उद्घाटिताः, सहैव एते कोषाः आधार–सङ्ख्यया दूरवाणी–सङ्ख्यया च संलग्नाः सन्ति।

## मिग–21

षड्-दशकेभ्यः अपि अधिकं कालं यावत् राष्ट्रं सेव्यमानाय भारतीय-वायुसेनयाः प्रख्यात-युद्धविमानाय 'मिग–21' इत्यस्मै अद्य सम्मानपूर्वकं अन्त्यप्रस्थानं प्रदत्तम्। चण्डीगढ़-विमानपत्तने सम्पन्ने अस्मिन् प्रस्थानिक-समारोहे रक्षामन्त्री राजनाथसिंहः, चीफ-ऑफ-डिफेंस-स्टाफ-जनरल-अनिल-चौहानः, वायुसेनायाः प्रमुखः एयर-मार्शल ए.पी.सिंहः अन्ये च गणमान्य-जनाः उपस्थिताः आसन्। मिग–21 इत्यस्य विमानस्य सञ्चालनं औपचारिक-प्रदर्शनेन सह सम्पन्नः। अत्रावसरे श्रीसिंहेन प्रोक्तं यत् एकसप्तत्यधिक-नवदशतमे वर्षे भारत-पाकिस्तान-युद्धे मिग-21 इत्यस्य अपूर्व-योगदानं आसीत्। तेन प्रोक्तं यत् एतादृशाः अनेके अवसराः आगताः यदा मिग-21 इत्यनेन स्वस्य निर्णायक-क्षमतायाः प्रदर्शनं कृतम्। तेन प्रोक्तं यत् मिग–21 इति राष्ट्रीयगौरवम् अस्ति। तस्य सर्वातिश्रेष्ठा विशेषता तस्य बहुमुखी-प्रतिभा वर्तते।

## बाइट-राजनाथ-मिग-21-26 सेकंड

सः प्रोक्तवान् यत् स्वस्य दीर्घकालिक-जीवने विमानेन बहवः कार्यभाराः निर्व्यूढाः। चीन-भारत-युद्धस्य अनन्तरं त्रिषष्ट्यधिक-नवदशतमे वर्षे भारतीय-वायु-सेनायां एतत् विमानं सम्मिलितं मिग-21 इति देशस्य प्रथमं सुपरसोनिक-युद्ध-विमानम् आसीत् ।

राष्ट्रपतिः

राष्ट्रपति-पदासीना द्रौपदी-मुर्मूः अद्य नव-दिल्लीस्थे राष्ट्रपति-भवनस्य सांस्कृतिक-केन्द्रे चतुर्विंशत्यधिक-द्विसहस्रतम वर्षस्य प्रतिष्ठित-राष्ट्रीय-भूविज्ञान- पुरस्कारं प्रदत्तवती। राष्ट्रीय-भूविज्ञान-पुरस्कारः भूविज्ञानस्य क्षेत्रे देशस्य पुरातनेषु प्रतिष्ठित-सम्मानेषु च अन्यतमः वर्तते। पुरस्कार-विजेतृभ्यः शुभकामनां प्रयच्छन्त्या राष्ट्रपतिना प्रोक्तं यत् एषः पुरस्कारः भूविज्ञानस्य क्षेत्रे तेषां प्रतिबद्धतां, नवाचारं, उत्कृष्टताञ्च सम्मानयितुं प्रदीयते। तया एतत् अपि प्रकाशितम् यत् खनिजैः मानवसभ्यतायाः विकासे महत्वपूर्णं योगदानं प्रदत्तं सहैव उद्योगेषु आधारशिलाऽपि संस्थापिता। राष्ट्रपतिः प्रोक्तवती यत् कृष्णाङ्गारकेण सहैव लौह-धातुना विना औद्योगिकीकरणस्य कल्पनाऽपि दुस्साध्या वर्तते।

मनमोहन सिंह

प्रधानमन्त्रिणा नरेन्द्रमोदिना पूर्वप्रधानमन्त्रिणे डॉ. मनमोहनसिंहाय तस्य जयन्त्यवसरे श्रद्धांजलिः समर्पितः। एकस्मिन् सामाजिक-सञ्जालीय-सन्देशे श्रीमोदिना राष्ट्रनिर्माणे तस्य योगदानं स्मृतमिति।

डोनाल्ड-ट्रम्पः

संयुक्त-राज्य-अमेरिकायाः राष्ट्रपति-डोनाल्ड-ट्रम्पः प्रोक्तवान् यत् सः इज़राइल-देशस्य पश्चिम-तटोऽपरि अधिकारः नैव अङ्गीकरिष्यति। श्री-ट्रम्प इत्यनेन इयं टिप्पणिः गतदिने वार्ताहरैः सह वार्तालापावसरे कृता। इतः पूर्वं इज़राइल-प्रधानमन्त्री बेंजामिन नेतन्याहुः अद्य न्यूयॉर्क-नगरे संयुक्तराष्ट्र-महासभायाः सम्बोधनार्थं अमेरिकां सम्प्राप्तवान्। संयुक्त-राष्ट्र-महासभा-शिखर-सम्मेलनानन्तरं यदा अनेकैः देशैः फ़िलिस्तीन-देशाय औपचारिक-रूपेण मान्यता प्रदत्ता तदा अवसादः सम्वर्धितः। ट्रम्पस्य टिप्पण्या इज़राइल-सर्वकारः स्तब्धो जातः।

**<u>विंशति-प्रतिविंशतिः</u>**

पुरुषाणां विंशति-प्रतिविंशतिः एशिया-चषक-प्रतिस्पर्धा दुबई-नगरे भारत-श्रीलंकादेशयोः मध्ये अन्तिमा-'सुपर-फोर' इत्यस्यान्तर्गतं भविष्यति। स्पर्धेऽयं अद्य रात्रौ अष्टवादने समारप्स्यते। भारतेन पूर्वमेव निर्णायक-चरणाय स्थानं सुनिश्चितमस्ति, अपरत्र श्रीलंकादलम् प्रतिस्पर्धातः बहिर्भूतः। निर्णायक-स्पर्धा तावत् भारत-पाकिस्तानदेशयोः मध्ये भविष्यति। गतदिने पाकिस्तानदेशेन बांग्लादेशः एकादश-अङ्कैः पराजित्य निर्णायक-स्पर्धायां स्वस्य स्थानं सुरक्षितम्।

।। इति वार्ता: ।।